# २. दानप्रशंसा

प्रथमः भागः

## पठन्तु, विचिन्त्य वदन्तु

भगवान् श्रीकृष्णः अर्जुनं प्रति श्रीमद्भगवद्गीतायाम् एवमवोचत् ।

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**
**यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रुणु इति ।**

**भावः -** आहारः, यज्ञः तपश्च त्रिविधम् । दानञ्च त्रिविधमिति सात्विक - राजस - तामसभेदेन ।

एतेषु आहारयज्ञस्तपोदानेषु दानस्यैकं विशिष्टं स्थानं वर्तते । तत्र दातव्यमिति धिया यत् दानं अनुपकारिणे दीयते तत् सात्विकमुच्यते ।

यत् दानं प्रत्युपकारार्थं दीयते तत् राजसमुच्यते ।

यत् दानम् अदेशकाले, अपात्रेभ्यः दीयते तत् असत्कृतम् अवज्ञातं तामसमिति कथ्यते ।

**प्रश्नाः ?**

१. श्रीकृष्णः अर्जुनं प्रति किम् अवोचत् ?
२. सात्विक - राजस - तामसभेदेन के के त्रिविधाः इति श्रीकृष्णेन उक्तम् ?
३. सात्विकं दानं नाम किम् ?
४. राजसं दानं नाम किम् ?
५. तामसं दानं नाम किम् ?
६. दानस्य महत्वप्रतिपादकान् श्लोकान् वदन्तु ।

**उद्देश्यम्**

★ समाजे धनं कथम् उपयोक्तव्यमिति ज्ञानसम्पादनम् ।
छात्रेषु दानगुणमाहात्म्यप्रकाशनम् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।

© SCERT not to be republished



1. गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात् ।
   स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ।।

2. आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः।
   गतिरेकैव वित्तस्य दानमन्या विपत्तयः।।

* 3. किसलयानि कुतः कुसुमानि वा
   क्व च फलानि तथा नववीरुधाम् ।
   अयमकारणकारुणिको न
   चेद्वितरतीह पयांसि पयोधरः ।।

* 4. धत्ते भरं कुसुमपत्रफलावलीनां
   धर्मव्यथां वहति शीतभवं रुजं च ।
   यो देहमर्पयति चान्यसुखस्य हेतो -
   स्तस्मै वदान्यगुरवे तरवे नमस्ते ।।

5. उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
   तडागोदरसंस्थानां परीवाह इवाम्भसाम् ।।

* 6.दानेन भूतानि वशीभवन्ति
   दानेन वैराण्यपि यान्ति नाशम् ।
   परोऽपि बन्धुत्वमुपैति दानै -
   र्दानं हि सर्वव्यसनानि हन्ति ।।

7. द्वारं द्वारमटन् भिक्षुः शिक्षत्येवं न याचते ।
अदत्त्वा मादृशो माभूत् दत्वा त्वं त्वादृशो भव ॥

8. कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ॥

9. याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्नगिरिभिर्न समुद्रैः ॥

10. जले तैलं खले गुह्यं पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं यान्ति विस्तारं वस्तुशक्तितः ॥

## भावाः

1. केवलं धनस्य सञ्चयेन कोऽपि मानवः गौरवं न प्राप्नोति । दानेन एव सः गौरवं प्राप्नोति । मेघः स्वच्छं जलं ददाति इति कारणतः तेषां स्थानम् उपरि अस्ति । स्वच्छं जलं न ददाति इति कारणतः जलधेः स्थानम् अधः अस्ति ।
2. बहुविधानि कष्टानि अनुभूय सञ्चितं धनं प्राणेभ्यः अपि गरीयः भवति । तादृशस्य धनस्य एका एव गतिः अस्ति । सा गतिः दानम् । अवशिष्टाः गतयः आपत्कारिण्यः एव ।
3. मेघः स्वस्य प्रयोजनम् अदृष्ट्वा सर्वेषां कृते जलं वितरति । अतः स मेघः अकारणकरुणापरः। एषः मेघः जलं न ददाति चेत् नवलतानां पल्लवानि, पुष्पाणि, फलानि अपि न प्रभवन्ति ।
4. पुष्पाणां, पत्राणां, फलानां समूहस्य भारं वहति वृक्षः। आतपे स्थित्वा आतपबाधां शीतकाले शीतबाधां च सहते । अन्येषां सुखाय स्वस्य देहमपि समर्पयति । अतः वृक्षः वदान्यानां गुरुः। तस्मै नमः।
5. आवश्यकतायाः अधिकम् अर्जितस्य धनस्य त्यागेनैव रक्षणं भवति, यथा तटाके पूर्णतया स्थितस्य जलस्य परीवाहः एव रक्षणं करोति ।
6. दानं कुर्मः चेत् सर्वे प्राणिनः वशाः भवन्ति । दानकारणेन विरोधः अपि नश्यति । दानेन इतरजनः अपि बान्धव्यं प्राप्नोति । दानेन सर्वाणि कष्टानि नश्यन्ति ।

© SCERT not to be republished

7. भिक्षुकः प्रतिगृहम् अटन् भिक्षां याचते इति चिन्तयामः। किन्तु सः स्वभिक्षाटनेन एकं विषयं शिक्षयति अस्मान् त्वं दानं न करोषि चेत् मादृशः भिक्षुकः भविष्यसि। दानं करोषि चेत् सर्वदा दानं कुर्वन् दानी भवसि इति।

8. कर्णः स्वशरीरभागभूतं सहजकवचकुण्डलं दत्तवान्। शिबिः स्वशरीरात् मांसं दत्तवान्। जीमूतवाहनः स्वस्य प्राणान् दत्तवान्। दधीचिः अस्थीनि दत्तवान्। महात्मानः तेषां सर्वमपि दातुं सिद्धाः भवन्ति।

9. याचकजनस्य इच्छाः पूरयितुं यः प्रयत्नमेव न करोति तस्य जन्म एव व्यर्थम्। तेन कारणेन एव एषा भूमिः अतिभारवती। वृक्षैः पर्वतैः, सागरैः न भारवती इयं भूमिः।

10. जले तैलं पतति चेत् स्वयं विस्तरति। दुष्टे रहस्यं न तिष्ठति, स सर्वान् वदति। योग्ये पुरुषे एव दानं समुचितम्। बुद्धिमते शास्त्रं शिक्षणीयम्। वस्तुशक्तिमाहात्म्यात् सन्दर्भमनुसृत्य विस्तरति।

## एतानि कुर्वन्तु

### I. भावावगाहनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु।**

१. दानम् कतिविधम् ?

२. महात्मा इति कं वदन्ति ? किमर्थम् ?

३. केषाञ्चन दानगुणसम्पन्नानां महात्मनां नामानि वदन्तु ?

४. दानस्य महत्वं किम् ?

५. कीदृशं दानं श्रेयस्करमिति, किमर्थमित्यपि कक्ष्यायां मित्रैस्सह चर्चां कुर्वन्तु ?

**आ) श्लोकेषु विद्यमानानि क्रियापदानि चित्वा लिखन्तु।**

**इ) कोष्ठकस्थानि पदानि उपयुज्य वाक्यानि पूरयन्तु।**

| | | | | |
|---|---|---|---|---|
| भूतानि | दानम् | महात्मनाम् | दानात् | तरवे |

१. गौरवं प्राप्यते.......................।

२. गतिरेकैव वित्तस्य ..........................।

३. तस्मै वदान्यगुरवे ..................... नमस्ते।

४. दानेन ......................... वशीभवन्ति।

५. नास्त्यदेयं ..............।

© SCERT not to be republished

ई) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

मानवजीवने नीतिश्लोकानाम् आवश्यकता अतीव विद्यते । श्लोकानां पठनेन मानवानां बुद्धिविकासः, मनोविकासः, सामाजिकविकासः संस्कारवृद्धिश्च सिद्ध्यन्ति। नीतिवर्तनेन मानवाः महनीयाः भवन्ति ।

१. मानवजीवने केषाम् आवश्यकता विद्यते ?

२. नीतिश्लोकानां पठनेन को लाभः?

३. मानवः महनीयाः कदा भवन्ति ?

४. अस्यानुच्छेदस्य शीर्षिकां लिखन्तु ?

उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. याचकः किम् अस्मान् शिक्षयति ?

२. ‘‘वदान्यगुरवे तरवे नमः’’ इति किमर्थमुक्तम् ?

३. वित्तस्य गतिः का ?

४. ‘‘वित्तानां त्याग एव रक्षणम्’’ इति किमर्थमिति सूचयन्तु ?

५. दानेन के के लाभाः भवन्ति ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. पयोदानाम् उच्चस्थितिविषये भवताम् अभिप्रायः कः ?

२. दानेषु कीदृशं दानं कर्तुं भवन्तः इच्छन्ति ?

३. ‘‘दानेन भूतानि वशीभवन्ति’’ इत्यस्य श्लोकस्य भावं स्वीयवाक्यैः लिखन्तु ?

४. ‘‘वित्तानां त्याग एव हि रक्षणम्’’ अस्मिन् विषये भवताम् अभिप्रायः कः ?

५. भिक्षुकः याचमानस्सन् दानं कुर्वन्त्विति सूचयति । भवान् किं सूचयति ?

६. महात्मनाम् अदेयं किमपि नास्ति । परन्तु सामान्याः दानविषये किं चिन्तयन्ति ?

©SCERT not to be republished

### आ) अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।

१. दानं किमर्थं करणीयम् इति स्वीयवाक्यैः लिखन्तु ?

२. "गुरुसदृशः तरुः" इति किमर्थमुक्तम् ?

३. प्रस्तुतपाठे विविधैः श्लोकैः भवता ज्ञातान् विषयान् लिखन्तु ?

### इ) सर्जनात्मकतया समाधानानि लिखन्तु ।

१. दानमहत्त्वस्य सूचिकाः सूक्तीः च लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषाया अनुवदन्तु ।

భారతదేశం యొక్క ప్రతిష్ఠను ఇనుమడింపజేయునవి సంస్కృతభాష మరియు సంస్కృతి. సంస్కృతభాష సరళమైనది. వ్యావహారికముగా అందరికీ ఉపయోగపడు భాష. శాస్త్రములన్నియు ఇందే ఉన్నవి. ఇటువంటి గొప్పదైన సంస్కృత భాషలోనే మనం మాట్లాడాలి.

### ई) प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

भवतां कक्ष्यायां परोपकारं कुर्वतः छात्रान् कथमभिनन्दन्ति ।

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

#### अ) अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानां पदानां पर्यायपदानि लिखन्तु ।

**उदा** - कोशागारे वित्तं बहु वर्तते । ( धनम् वसु )

(१) वर्षासु आकाशे मेघः गर्जति ।

(२) उद्यानवने कुन्दलतायाः कुसुमं सुगन्धं प्रसारयति ।

(३) हिमालयपर्वते देवदारूनामकः तरुः अत्युन्नतः।

(४) दयाविषये मेघः एव गरीयान् ।

(५) तुङ्गभद्रानद्याः जलं मधुरं वर्तते ।

#### आ) अधः दत्तेषु वाक्येषु कस्यचन पदस्य पर्यायपदानि सन्ति । चित्वा लिखन्तु ।

पयोदः वर्षं ददाति । सस्यानि च जलदस्य वर्षणेनैव फलन्ति । कर्षकाणां मित्रं जलधरः एव ।

© SCERT not to be republished

### इ) सम्बद्धपदैः वाक्यानि रचयन्तु ।

| | | | |
|---|---|---|---|
| सज्जनाः | जलं | खादति | न |
| स्वयं | स्वकीयं | ददाति | नदी |
| वृक्षः | फलानि | परहितं | पिबति |
| न | कुर्वन्ति | मधुराणि | मेघः |

## 2. व्याकरणांशाः

### अ) अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानां विग्रहवाक्यानि अवगच्छन्तु ।

(क) कुचेलः कृष्णाश्रितः सन् सम्पदं प्राप्तवान् ।

(ख) उपाध्यायः शिष्यस्य पितृसदृशः।

(ग) चारुदत्तः भूतबलिं ददाति ।

(घ) दिलीपस्य राज्ये चोरभयं नासीत् ।

(ङ) संस्कृतच्छात्राः संस्कृतेन वदन्ति ।

(च) वस्त्रम् आतपशुष्कम् अस्ति ।

| | समासपदम् | विग्रहवाक्यम् |
|---|---|---|
| १. | कृष्णाश्रितः | कृष्णम् श्रितः |
| २. | पितृसदृशः | पित्रा सदृशः |
| ३. | भूतबलिः | भूतेभ्यः बलिः |
| ४. | चोरभयम् | चोरात् भयम् |
| ५. | संस्कृतच्छात्राः | संस्कृतस्य छात्राः |
| ६. | आतपशुष्कम् | आतपे शुष्कम् |

★ **उपरितनविग्रहवाक्येषु विभक्तिं द्रष्टुं शक्नुमः। अर्थस्य आधारेण पदविभागसमये प्रथमपदं विभक्तियुक्तं भवति । यत् पदं यस्यां विभक्तौ अस्ति, तत् तस्याः विभक्तेः नाम्ना व्यवह्रियते । अस्य "तत्पुरुषसमासः" इति व्यवहारः।**

### आ) अधः दत्तानां समासपदानां विग्रहवाक्यानि लिखन्तु ।

(क) अन्नबुभुक्षुः　　(ख) वेङ्कटेशसमः

(ग) यूपदारुः　　(घ) व्याघ्रभीतः

(ङ) देशभक्ताः　　(च) कार्यनिपुणः



© SCERT not to be republished

इ) अधः दत्तानि वाक्यानि पठन्तु, अवगच्छन्तु ।

**विद्वत्कवयः कवयः ।**

**विद्वन्महिषी महिषी ।**

अत्र कवयः कवयः इति पदयोः महिषी महिषी इति पदयोश्च अर्थभेदः नास्ति, किन्तु तात्पर्यभेदः विद्यते ।

**विवरणम् : यत्र अव्यवधानतया तात्पर्यभेदेन पदानां पुनरुक्तिः भवति तत्र "लाटानुप्रासालङ्कारः" भवति ।**

ई) अधः दत्तानि वाक्यानि पठन्तु । प्रश्नानाम् आधारेण तेषां अलङ्कारनिरूपणं कुर्वन्तु ।

(क) श्रीकृष्णवर्णनपरा जिह्वा जिह्वा ।

(ख) श्रीरामदर्शनपरे नयने नयने ।

(ग) श्रीशम्भुपूजनपरौ करौ करौ ।

१. अत्र कः विशेषः दृश्यते ।

२. द्वयोः रेखाङ्कितपदयोः मध्ये को भेदः दृश्यते ? अर्थभेदो वा तात्पर्यभेदो वा ?

३. अयं कः अलङ्कारः ?

४. लाटानुप्रासालङ्कारे कः अंशः विद्यते ?

उ) अधः दत्तानां वाक्यानम् अलङ्कारनिरूपणं कुर्वन्तु ।

१. सुभाषितकर्णनपरौ कर्णौ कर्णौ ।

२. सर्वसुखदायकं मनः मनः ।

३. सर्वेषामेकत्वभावना भावना ।

### परियोजनाकार्यम्

ग्रन्थालयं गत्वा दानेन सम्बद्धाः कथाः तत्सम्बद्धान् श्लोकान् च सङ्कलयन्तु । भित्तिपत्रेण विलिख्य प्रदर्शयन्तु ।

**मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः**

© SCERT not to be republished